# ॥ अमृतबिन्दु ॥
# || amṛtabindu ||

**Informazioni:**
Titolo: Amritabindu Upanishad
Nome file: amritabindu_upanishad
Categoria: Upanishhat, Svara, Devii, Annapurna
Locazione: http://www.culturavedica.org/sanscrito-sanskrit
Autore: Tradizione vedica
Linguaggio: Sanscrito
Soggetto: Filosofia/Religione/Induismo
Translitterazione: http://www.culturavedica.org
Correzione: http://www.culturavedica.org
Descrizione: 21 di 108, Krishna-Yajur-Veda, Yoga Upanishad
Ultima revisione: 11 maggio 2018
Accesso: http://www.culturavedica.org/pdf/amritabindu_upanishad
Mail: info@culturavedica.org
Font: Sanskrit 2003
Testo editabile disponibile: info@culturavedica.org

**© Quest'opera è stata digitalizzata e messa a disposizione da "CulturaVedica", può essere usata per la ricerca e lo studio personale. Non può essere usata (senza permesso) per scopo promozionale o commerciale.**

Aiutate a mantenere il rispetto e lo spirito del sito.

CULTURA VEDICA

| ॥ अमृतबिन्दु ॥ | \|\| amṛtabindu \|\| |
|---|---|
| ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै । | oṁ saha nāvavatu saha nau bhunaktu saha vīryaṃ karavāvahai \| |
| तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ | tejasvināvadhītamastu mā vidviṣāvahai |
| ॐ शान्तिः शान्तिः शान्तिः । | \|\| oṁ śāntiḥ śāntiḥ śāntiḥ \| |
| हरिः ॐ ॥ | hariḥ oṁ \|\| |
| मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च । | mano hi dvividhaṃ proktaṃ śuddhaṃ cāśuddhameva ca \| |
| अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ॥ १ ॥ | aśuddhaṃ kāmasaṃkalpaṃ śuddhaṃ kāmavivarjitam \|\| 1\|\| |
| मन एव मनुष्याणां कारणं बन्धमोक्षयोः । | mana eva manuṣyāṇāṃ kāraṇaṃ bandhamokṣayoḥ \| |
| बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ॥ २ ॥ | bandhāya viṣayāsaktaṃ muktyai nirviṣayaṃ smṛtam \|\| 2\|\| |
| यतो निर्विषयस्यास्य मनसो मुक्तिरिष्यते । | yato nirviṣayasyāsya manaso muktiriṣyate \| |
| अतो निर्विषयं नित्यं मनः कार्यं मुमुक्षुणा ॥ ३ ॥ | ato nirviṣayaṃ nityaṃ manaḥ kāryaṃ mumukṣuṇā \|\| 3\|\| |
| निरस्तविषयासङ्गं संनिरुद्धं मनो हृदि । | nirastaviṣayāsaṅgaṃ saṃniruddhaṃ mano hṛdi \| |
| यदाऽऽयात्यात्मनो भावं तदा तत्परमं पदम् ॥ ४ ॥ | yadā:':'yātyātmano bhāvaṃ tadā tatparamaṃ padam \|\| 4\|\| |
| तावदेव निरोद्धव्यं यावधृदि गतं क्षयम् । | tāvadeva niroddhavyaṃ yāvadhṛdi gataṃ kṣayam \| |
| एतज्ज्ञानं च ध्यानं च शेषो न्यायश्च विस्तरः ॥ ५ ॥ | etajjñānaṃ ca dhyānaṃ ca śeṣo nyāyaśca vistaraḥ \|\| 5\|\| |
| नैव चिन्त्यं न चाचिन्त्यं न चिन्त्यं चिन्त्यमेव च । | naiva cintyaṃ na cācintyaṃ na cintyaṃ cintyameva ca \| |
| पक्षपातविनिर्मुक्तं ब्रह्म सम्पद्यते तदा ॥ ६ ॥ | pakṣapātavinirmuktaṃ brahma sampadyate tadā \|\| 6\|\| |
| स्वरेण संधयेद्योगमस्वरं भावयेत्परम् । | svareṇa saṃdhayedyogamasvaraṃ bhāvayetparam \| |
| अस्वरेणानुभावेन नाभावो भाव इष्यते ॥ ७ ॥ | asvareṇānubhāvena nābhāvo bhāva iṣyate \|\| 7\|\| |
| तदेव निष्कलं ब्रह्म निर्विकल्पं निरञ्जनम् । | tadeva niṣkalaṃ brahma nirvikalpaṃ nirañjanam \| |
| तद्ब्रह्माहमिति ज्ञात्वा ब्रह्म सम्पद्यते ध्रुवम् ॥ ८ ॥ | tadbrahmāhamiti jñātvā brahma sampadyate dhruvam \|\| 8\|\| |
| निर्विकल्पमनन्तं च हेतुदृष्टान्तवर्जितम् । | nirvikalpamanantaṃ ca hetudṛṣṭāntavarjitam \| |
| अप्रमेयमनादिं च यज्ज्ञात्वा मुच्यते बुधः ॥ ९ ॥ | aprameyamanādiṃ ca yajjñātvā mucyate budhaḥ \|\| 9\|\| |
| न निरोधो न चोत्पत्तिर्न बद्धो न च साधकः । | na nirodho na cotpattirna baddho na ca sādhakaḥ \| |
| न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ १० ॥ | na mumukṣurna vai mukta ityeṣā paramārthatā \|\| 10\|\| |
| एक एवात्मा मन्तव्यो जाग्रत्स्वप्नसुषुप्तिषु । | eka evātmā mantavyo jāgratsvapnasuṣuptiṣu \| |
| स्थानत्रयव्यतीतस्य पुनर्जन्म न विद्यते ॥ ११ ॥ | sthānatrayavyatītasya punarjanma na vidyate \|\| 11\|\| |
| एक एव हि भूतात्मा भूते भूते व्यवस्थितः । | eka eva hi bhūtātmā bhūte bhūte vyavasthitaḥ \| |
| एकधा बहुधा चैव दृश्यते जलचन्द्रवत् ॥१२॥ | ekadhā bahudhā caiva dṛśyate jalacandravat \|\|12\|\| |
| घटसंवृतमाकाशं नीयमानो घटे यथा । | ghaṭasaṃvṛtamākāśaṃ nīyamāno ghaṭe yathā \| |
| घटो नीयेत नाकाशः तद्वज्जीवो नभोपमः ॥१३॥ | ghaṭo nīyeta nākāśaḥ tadvajjīvo nabhopamaḥ \|\|13\|\| |
| घटवद्विविधाकारं भिद्यमानं पुनः पुनः । | ghaṭavadvividhākāraṃ bhidyamānaṃ punaḥ punaḥ \| |
| तद्भेदे न च जानाति स जानाति च नित्यशः ॥१४॥ | tadbhede na ca jānāti sa jānāti ca nityaśaḥ \|\|14\|\| |
| शब्दमायावृतो नैव तमसा याति पुष्करे । | śabdamāyāvṛto naiva tamasā yāti puṣkare \| |
| भिन्ने तमसि चैकत्वमेक एवानुपश्यति ॥१५॥ | bhinne tamasi caikatvameka evānupaśyati \|\|15\|\| |
| शब्दाक्षरं परं ब्रह्म तस्मिन्क्षीणे यदक्षरम् । | śabdākṣaraṃ paraṃ brahma tasminkṣīṇe yadakṣaram \| |
| तद्विद्वानक्षरं ध्यायेद्यदीच्छेच्छान्तिमात्मनः ॥१६॥ | tadvidvānakṣaraṃ dhyāyedyadīcchecchāntimātmanaḥ \|\|16\|\| |
| द्वे विद्ये वेदितव्ये तु शब्दब्रह्म परं च यत् । | dve vidye veditavye tu śabdabrahma paraṃ ca yat \| |
| शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति ॥१७॥ | śabdabrahmaṇi niṣṇātaḥ paraṃ brahmādhigacchati \|\|17\|\| |
| ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः । | granthamabhyasya medhāvī jñānavijñānatatparaḥ \| |
| पलालमिव धान्यार्थी त्यजेद्ग्रन्थमशेषतः ॥१८॥ | palālamiva dhānyārthī tyajedgranthamaśeṣataḥ \|\|18\|\| |
| गवामनेकवर्णानां क्षीरस्याप्येकवर्णता । | gavāmanekavarṇānāṃ kṣīrasyāpyekavarṇatā \| |
| क्षीरवत्पश्यते ज्ञानं लिङ्गिनस्तु गवां यथा ॥१९॥ | kṣīravatpaśyate jñānaṃ liṅginastu gavāṃ yathā \|\|19\|\| |
| घृतमिव पयसि निगूढं भूते भूते च वसति विज्ञानम् । | ghṛtamiva payasi nigūḍhaṃ bhūte bhūte ca vasati vijñānam \| |
| सततं मनसि मन्थयितव्यं मनो मन्थानभूतेन ॥२०॥ | satataṃ manasi manthayitavyaṃ mano manthānabhūtena \|\|20\|\| |
| ज्ञाननेत्रं समाधाय चोद्धरेद्वह्निवत्परम् । | jñānanetraṃ samādhāya coddharedvahnivatparam \| |
| निष्कलं निश्चलं शान्तं तद्ब्रह्माहमिति स्मृतम् ॥२१॥ | niṣkalaṃ niścalaṃ śāntaṃ tadbrahmāhamiti smṛtam \|\|21\|\| |
| सर्वभूताधिवासं यद्भूतेषु च वसत्यपि । | sarvabhūtādhivāsaṃ yadbhūteṣu ca vasatyapi \| |
| सर्वानुग्राहकत्वेन तदस्म्यहं वासुदेवः ॥२२॥ | sarvānugrāhakatvena tadasmyahaṃ vāsudevaḥ \|\|22\|\| |
| ॐ सह नाववतु सह नौ भुनक्तु सह वीर्यं करवावहै । | oṁ saha nāvavatu saha nau bhunaktu saha vīryaṃ karavāvahai \| |
| तेजस्विनावधीतमस्तु मा विद्विषावहै ॥ | tejasvināvadhītamastu mā vidviṣāvahai \|\| |
| ॐ शान्तिः शान्तिः शान्तिः । | oṁ śāntiḥ śāntiḥ śāntiḥ \| |
| हरिः ॐ ॥ | hariḥ oṁ \|\| |

॥ इति कृष्ण यजुर्वेदेऽमृतबिन्दूपनिषत् समाप्ता ॥ || iti kṛṣṇa yajurvede:'mṛtabindūpaniṣat samāptā ||

CULTURA VEDICA